# श्रीकृष्णाष्टकम्

वसुदेव सुतं देवं कंसचाणूर मर्दनम्
देवकी परमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥ १॥

अतसी पुष्प संकाशम् हार नूपुर शोभितम्
रत्नकण्कण केयूरं कृष्णं वन्दे जगद्गुरुम् ॥ २॥

कुटिलालक संयुक्तं पूर्णचन्द्र निभाननम्
विलसत्कुण्डल धरं कृष्णं वन्दे जगद्गुरुम् ॥ ३॥

मन्दारगन्ध संयुक्तं चारुहासं चतुर्भुजम्
बर्हिपिञ्छाव चूडाङ्गं कृष्णं वन्दे जगद्गुरुम् ॥ ४॥

उत्फुल्लपद्म पत्राक्षं नीलजीमूत सन्निभम्
यादवानां शिरोरत्नं कृष्णं वन्दे जगद्गुरुम् ॥ ५॥

रुक्मिणी केळि संयुक्तं पीतांबर सुशोभितम्
अवाप्त तुलसी गन्धं कृष्णं वन्दे जगद्गुरुम् ॥ ६॥

गोपिकानां कुचद्वन्द्व कुंकुमाङ्कित वक्षसम्
श्री निकेतं महेष्वासं कृष्णं वन्दे जगद्गुरुम् ॥ ७॥

श्रीवत्साङ्कं महोरस्कं वनमाला विराजितम्
शङ्ख चक्र धरं देवं कृष्णं वन्दे जगद्गुरुम् ॥ ८॥

कृष्णाष्टक मिदं पुण्यं प्रातरुत्थाय यः पठेत् ।
कोटिजन्म कृतं पापं स्मरणेन विनष्यति ॥

॥ इति कृष्णाष्टकम् ॥